श्री दीपलक्ष्मी स्तवं

अंतर्गृहे हेमसुवेदिकायां सम्मार्जनालेपनकर्म कृत्वा ।
विधानधूपातुलपंचवर्णं चूर्णप्रयुक्ताद्भुतरंगवल्यां ॥

अगाधसंपूर्णसरस्समाने, गोसर्पिषाऽऽपूरितमध्यदेशे ।
मृणालतंतुकृतवर्त्तियुक्ते पुष्पावतंसे तिलकाभिरामे ॥

परिष्कृतस्थापितरत्नदीपे ज्योतिर्मयीं प्रज्ज्वलयामि देवीं ।
नमाम्यहं मत्कुलवृद्धिदात्रीं, सौदादि सर्वांगणशोभमानां ॥

भो दीपलक्ष्मि प्रथितं यशो मे प्रदेहि मांगल्यममोघशीले ।
भर्तृप्रियां धर्मविशिष्टशीलां, कुरुष्व कल्याण्यनुकंपया मां ॥

यांतर्बहिश्चापि तमोऽपहंत्री, संध्यामुखाराधितपादपद्मा ।
त्रयीसमुद्घोषितवैभवा सा, ह्यनन्यकामे हृदये विभातु ॥

भो दीप ब्रह्मरूपस्त्वं ज्योतिषां प्रभुरव्ययः ।
आरोग्यं देहि पुत्रांश्च अवैधव्यं प्रयच्छ मे ॥

संध्यादीपस्तवमिदं नित्यं नारी पठेत्तु या ।
सर्वसौभाग्ययुक्ता स्याल्लक्ष्म्यनुग्रहतस्सदा ॥

शरीरारोग्यमैश्वर्यमरिपक्षक्षयस्सुखं ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभं ॥

इति दीपलक्ष्मी स्तवं संपूर्णं ।